श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्तसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तसप्ततितमः सर्गः ॥

## हनुमता निकुम्भस्य वधः

निकुम्भो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितम्।
प्रदहन्निव कोपेन वानरेन्द्रमुदैक्षत ॥ **6.77.1** ॥

ततः स्रग्दामसन्नद्धं दत्तपञ्चाङ्गुलं शुभम्।
आददे परिघं धीरो महेन्द्रशिखरोपमम् ॥ **6.77.2** ॥

हेमपट्टपरिक्षिप्तं वज्रविद्रुमभूषितम्।
यमदण्डोपमं भीमं रक्षसां भयनाशनम् ॥ **6.77.3** ॥

तमाविध्य महातेजाः शक्रध्वजसमौजसम्।
निननाद विवृत्तास्यो निकुम्भो भीमविक्रमः ॥ **6.77.4** ॥

उरोगतेन निष्केण भुजस्थैरङ्गदैरपि।
कुण्डलाभ्यां च चित्राभ्यां मालया च सचित्रया ॥ **6.77.5** ॥

निकुम्भो भूषणैर्भाति तेन स्म परिघेण च।
यथेन्द्रधनुषा मेघः सविद्युत्स्तनयित्नुमान् ॥ **6.77.6** ॥

परिघाग्रेण पुस्फोट वातग्रन्थिर्महात्मनः।
प्रजज्वाल सघोषश्च विधूम इव पावकः ॥ **6.77.7** ॥

नगर्या विटपावत्या गन्धर्वभवनोत्तमैः।
सतारागणनक्षत्रं सचन्द्रसमहाग्रहम्।
निकुम्भपरिघाघूर्णं भ्रमतीव नभस्थलम्॥ **6.77.8** ॥

दुरासदश्च सञ्जज्ञे परिघाभरणप्रभः।
क्रोधेन्धनो निकुम्भाग्निर्युगान्ताग्निरिवोत्थितः॥ **6.77.9** ॥

राक्षसा वानराश्चापि न शेकुः स्पन्दितुं भयात्।
हनुमांस्तु विवृत्योरस्तस्थौ प्रमुखतो बली॥ **6.77.10** ॥

परिघोपमबाहुस्तु परिघं भास्करप्रभम्।
बली बलवतस्तस्य पातयामास वक्षसि॥ **6.77.11** ॥

स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः।
विकीर्यमाणः सहसा उल्काशतमिवाम्बरे॥ **6.77.12** ॥

स तु तेन प्रहारेण न चचाल महाकपिः।
परिघेण समाधूतो यथा भूमिचलेऽचलः॥ **6.77.13** ॥

स तथाभिहतस्तेन हनूमान् प्लवगोत्तमः।
मुष्टिं संवर्तयामास बलेनातिमहाबलः॥ **6.77.14** ॥

तमुद्यम्य महातेजा निकुम्भोरसि वीर्यवान्।
अभिचिक्षेप वेगेन वेगवान् वायुविक्रमः॥ **6.77.15** ॥

तत्र पुस्फोट वर्मास्य प्रसुस्राव च शोणितम्।
मुष्टिना तेन सञ्जज्ञे मेघे विद्युदिवोत्थिता॥ **6.77.16** ॥

स तु तेन प्रहारेण निकुम्भो विचचाल च।
स्वस्थश्चापि निजग्राह हनूमन्तं महाबलम्॥ **6.77.17** ॥

चुक्रुशुश्च तदा सङ्ख्ये भीमं लङ्कानिवासिनः।
निकुम्भेनोद्यतं दृष्ट्वा हनूमन्तं महाबलम्॥ **6.77.18**॥

स तथा ह्रियमाणोऽपि हनूमांस्तेन रक्षसा।
आजघानानिलसुतो वज्रकल्पेन मुष्टिना॥ **6.77.19**॥

आत्मानं मोक्षयित्वाथ क्षितावभ्यवपद्यत।
हनूमानुन्ममाथाशु निकुम्भं मारुतात्मजः॥ **6.77.20**॥

निक्षिप्य परमायत्तो निकुम्भं निष्पिपेष च।
उत्पत्य चास्य वेगेन पपातोरसि वेगवान्॥ **6.77.21**॥

परिगृह्य च बाहुभ्यां परिवृत्य शिरोधराम्।
उत्पाटयामास शिरो भैरवं नदतो महत्॥ **6.77.22**॥

अथ निनदति सादिते निकुम्भे
    पवनसुतेन रणे बभूव युद्धम्।
दशरथसुतराक्षसेन्द्रसूत्वो -
    भृशतरमागतरोषयोः सुभीमम्॥ **6.77.23**॥

व्यपेते तु जीवे निकुम्भस्य हृष्टा
    विनेदुः प्लवङ्गा दिशः सस्वनुश्च।
चचालेव चोर्वी पपातेव सा द्यौ -
    र्बलं राक्षसानां भयं चाविवेश॥ **6.77.24**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तसप्ततितमः सर्गः॥